# Narayani Stutih

# નારાયણીસ્તુતિઃ અથવા નારાયણીસૂક્તમ્

## Document Information

Text title : Narayanastuti durgA saptashatI

File name : nArAyaNIstutiH.itx

Category : devii, durgA, stotra, devI, sUkta

Location : doc_devii

Transliterated by : Ahto Jarve ajarve

Proofread by : Ahto Jarve ajarve

Description-comments : from durgA saptashatI adhyAya 11. Verses 7-23

Latest update : November 1, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2024

*sanskritdocuments.org*

# નારાયણીસ્તુતિઃ અથવા નારાયણીસૂક્તમ્

॥ દેવી માહાત્મ્યે એકાદશોऽધ્યાયઃ ॥

ॐ ઋષિરુવાચ ॥ ૧॥

દેવ્યા હતે તત્ર મહાસુરેન્દ્રે
સેન્દ્રાઃ સુરા વહ્નિપુરોગમાસ્તામ્ ।
કાત્યાયનીં તુષ્ટુવુરિષ્ટલાભાદ્
વિકાશિવક્ત્રાબ્જવિકાશિતાશાઃ ॥ ૨॥

દેવિ પ્રપન્નાર્તિહરે પ્રસીદ
પ્રસીદ માતર્જગતોऽખિલસ્ય ।
પ્રસીદ વિશ્વેશ્વરિ પાહિ વિશ્વં
ત્વમીશ્વરી દેવિ ચરાચરસ્ય ॥ ૩॥

આધારભૂતા જગતસ્ત્વમેકા
મહીસ્વરૂપેણ યતઃ સ્થિતાસિ ।
અપાં સ્વરૂપસ્થિતયા ત્વયૈત-
દાપ્યાયતે કૃત્સ્નમલઙ્ઘ્યવીર્યે ॥ ૪॥

ત્વં વૈષ્ણવીશક્તિરનન્તવીર્યા
વિશ્વસ્ય બીજં પરમાસિ માયા ।
સમ્મોહિતં દેવિ સમસ્તમેતત્
ત્વં વૈ પ્રસન્ના ભુવિ મુક્તિહેતુઃ ॥ ૫॥

વિદ્યાઃ સમસ્તાસ્તવ દેવિ ભેદાઃ
સ્ત્રિયઃ સમસ્તાઃ સકલા જગત્સુ ।
ત્વયૈકયા પૂરિતમમ્બયૈતત્
કા તે સ્તુતિઃ સ્તવ્યપરાપરોક્તિઃ ॥ ૬॥

સર્વભૂતા યદા દેવી ભુક્તિમુક્તિપ્રદાયિની ।

ત્વં સ્તુતા સ્તુતયે કા વા ભવન્તુ પરમોક્તયઃ ॥ ૭॥

સર્વસ્ય બુદ્ધિરૂપેણ જનસ્ય હૃદિ સંસ્થિતે ।
સ્વર્ગાપવર્ગદે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૮॥

કલાકાષ્ઠાદિરૂપેણ પરિણામપ્રદાયિનિ ।
વિશ્વસ્યોપરતૌ શક્તે નારાયણિ નમોઽસ્તુ તે ॥ ૯॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૦॥

સૃષ્ટિસ્થિતિવિનાશાનાં શક્તિભૂતે સનાતનિ ।
ગુણાશ્રયે ગુણમયે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧॥

શરણાગતદીનાર્તપરિત્રાણપરાયણે ।
સર્વસ્યાર્તિહરે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૨॥

હંસયુક્તવિમાનસ્થે બ્રહ્માણીરૂપધારિણિ ।
કૌશામ્ભઃક્ષરિકે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૩॥

ત્રિશૂલચન્દ્રાહિધરે મહાવૃષભવાહિનિ ।
માહેશ્વરીસ્વરૂપેણ નારાયણિ નમોઽસ્તુતે ॥ ૧૪॥

મયૂરકુક્કુટવૃતે મહાશક્તિધરેઽનઘે ।
કૌમારીરૂપસંસ્થાને નારાયણિ નમોઽસ્તુ તે ॥ ૧૫॥

શઙ્ખચક્રગદાશાર્ઙ્ગગૃહીતપરમાયુધે ।
પ્રસીદ વૈષ્ણવીરૂપે નારાયણિ નમોઽસ્તુ તે ॥ ૧૬॥

ગૃહીતોગ્રમહાચક્રે દંષ્ટ્રોદ્ધૃતવસુન્ધરે ।
વરાહરૂપિણિ શિવે નારાયણિ નમોઽસ્તુ તે ॥ ૧૭॥

નૃસિંહરૂપેણોગ્રેણ હન્તું દૈત્યાન્ કૃતોદ્યમે ।
ત્રૈલોક્યત્રાણસહિતે નારાયણિ નમોઽસ્તુ તે ॥ ૧૮॥

કિરીટિનિ મહાવજ્રે સહસ્રનયનોજ્જ્વલે ।
વૃત્રપ્રાણહરે ચૈન્દ્રિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૯॥

શિવદૂતીસ્વરૂપેણ હતદૈત્યમહાબલે ।
ઘોરરૂપે મહારાવે નારાયણિ નમોઽસ્તુ તે ॥ ૨૦॥

દંષ્ટ્રાકરાલવદને શિરોમાલાવિભૂષણે ।
ચામુણ્ડે મુણ્ડમથને નારાયણિ નમોઽસ્તુ તે ॥ ૨૧॥

લક્ષ્મિ લજ્જે મહાવિદ્યે શ્રદ્ધે પુષ્ટિ સ્વધે ધ્રુવે ।
મહારાત્રિ મહામાયે નારાયણિ નમોઽસ્તુ તે ॥ ૨૨॥

મેધે સરસ્વતિ વરે ભૂતિ બાભ્રવિ તામસિ ।
નિયતે ત્વં પ્રસીદેશે નારાયણિ નમોઽસ્તુતે ॥ ૨૩॥

સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુ તે ॥ ૨૪॥

એતત્તે વદનં સૌમ્યં લોચનત્રયભૂષિતમ્ ।
પાતુ નઃ સર્વભૂતેભ્યઃ કાત્યાયનિ નમોઽસ્તુ તે ॥ ૨૫॥

જ્વાલાકરાલમત્યુગ્રમશેષાસુરસૂદનમ્ ।
ત્રિશૂલં પાતુ નો ભીતેર્ભદ્રકાલિ નમોઽસ્તુ તે ॥ ૨૬॥

હિનસ્તિ દૈત્યતેજાંસિ સ્વનેનાપૂર્ય યા જગત્ ।
સા ઘણ્ટા પાતુ નો દેવિ પાપેભ્યો નઃ સુતાનિવ ॥ ૨૭॥

અસુરાસૃગ્વસાપઙ્કચર્ચિતસ્તે કરોજ્જ્વલઃ ।
શુભાય ખડ્ગો ભવતુ ચણ્ડિકે ત્વાં નતા વયમ્ ॥ ૨૮॥

રોગાનશેષાનપહંસિ તુષ્ટા
રુષ્ટા તુ કામાન્ સકલાનભીષ્ટાન્ ।
ત્વામાશ્રિતાનાં ન વિપન્નરાણાં
ત્વામાશ્રિતા હ્યાશ્રયતાં પ્રયાન્તિ ॥ ૨૯॥

એતત્કૃતં યત્કદનં ત્વયાદ્ય
ધર્મદ્વિષાં દેવિ મહાસુરાણામ્ ।
રૂપૈરનેકૈર્બહુધાત્મમૂર્તિં
કૃત્વામ્બિકે તત્પ્રકરોતિ કાન્યા ॥ ૩૦॥

વિદ્યાસુ શાસ્ત્રેષુ વિવેકદીપે-
ષ્વાદ્યેષુ વાક્યેષુ ચ કા ત્વદન્યા ।
મમત્વગર્તેઽતિમહાન્ધકારે
વિભ્રામયત્યેતદતીવ વિશ્વમ્ ॥ ૩૧॥

રક્ષાંસિ યત્રોગ્રવિષાશ્ચ નાગા
યત્રારયો દસ્યુબલાનિ યત્ર ।
દાવાનલો યત્ર તથાબ્ધિમધ્યે
તત્ર સ્થિતા ત્વં પરિપાસિ વિશ્વમ્ ॥ ૩૨॥

વિશ્વેશ્વરિ ત્વં પરિપાસિ વિશ્વં
વિશ્વાત્મિકા ધારયસીહ વિશ્વમ્ ।
વિશ્વેશવન્દ્યા ભવતી ભવન્તિ
વિશ્વાશ્રયા યે ત્વયિ ભક્તિનમ્રાઃ ॥ ૩૩॥

દેવિ પ્રસીદ પરિપાલય નોઽરિભીતે-
ર્નિત્યં યથાસુરવધાદધુનૈવ સદ્યઃ ।
પાપાનિ સર્વજગતાં પ્રશમં નયાશુ
ઉત્પાતપાકજનિતાંશ્ચ મહોપસર્ગાન્ ॥ ૩૪॥

પ્રણતાનાં પ્રસીદ ત્વં દેવિ વિશ્વાર્તિહારિણિ ।
ત્રૈલોક્યવાસિનામીડ્યે લોકાનાં વરદા ભવ ॥ ૩૫॥

દેવ્યુવાચ ॥ ૩૬॥

વરદાહં સુરગણા વરં યન્મનસેચ્છથ ।
તં વૃણુધ્વં પ્રયચ્છામિ જગતામુપકારકમ્ ॥ ૩૭॥

દેવા ઊચુઃ ॥ ૩૮॥

સર્વાબાધાપ્રશમનં ત્રૈલોક્યસ્યાખિલેશ્વરિ ।
એવમેવ ત્વયા કાર્યમસ્મદ્વૈરિવિનાશનમ્ ॥ ૩૯॥

દેવ્યુવાચ ॥ ૪૦॥

વૈવસ્વતેઽન્તરે પ્રાપ્તે અષ્ટાવિંશતિમે યુગે ।
શુમ્ભો નિશુમ્ભશ્ચૈવાન્યાવુત્પત્સ્યેતે મહાસુરૌ ॥ ૪૧॥

નન્દગોપગૃહે જાતા યશોદાગર્ભસમ્ભવા ।
તતસ્તૌ નાશયિષ્યામિ વિન્ધ્યાચલનિવાસિની ॥ ૪૨॥

પુનરપ્યતિરૌદ્રેણ રૂપેણ પૃથિવીતલે ।
અવતીર્ય હનિષ્યામિ વૈપ્રચિત્તાંશ્ચ દાનવાન્ ॥ ૪૩॥

ભક્ષયન્ત્યાશ્ચ તાનુગ્રાન્ વૈપ્રચિત્તાન્ મહાસુરાન્ ।

રક્તા દન્તા ભવિષ્યન્તિ દાડિમીકુસુમોપમાઃ ॥ ૪૪॥

તતો માં દેવતાઃ સ્વર્ગે મર્ત્યલોકે ચ માનવાઃ ।
સ્તુવન્તો વ્યાહરિષ્યન્તિ સતતં રક્તદન્તિકામ્ ॥ ૪૫॥

ભૂયશ્ચ શતવાર્ષિક્યામનાવૃષ્ટ્યામનમ્ભસિ ।
મુનિભિઃ સંસ્મૃતા ભૂમૌ સમ્ભવિષ્યામ્યયોનિજા ॥ ૪૬॥

તતઃ શતેન નેત્રાણાં નિરીક્ષિષ્યામ્યહં મુનીન્ ।
કીર્તયિષ્યન્તિ મનુજાઃ શતાક્ષીમિતિ માં તતઃ ॥ ૪૭॥

તતોઽહમખિલં લોકમાત્મદેહસમુદ્ભવૈઃ ।
ભરિષ્યામિ સુરાઃ શાકૈરાવૃષ્ટેઃ પ્રાણધારકૈઃ ॥ ૪૮॥

શાકમ્ભરીતિ વિખ્યાતિં તદા યાસ્યામ્યહં ભુવિ ।
તત્રૈવ ચ વધિષ્યામિ દુર્ગમાખ્યં મહાસુરમ્ ॥ ૪૯॥

દુર્ગાદેવીતિ વિખ્યાતં તન્મે નામ ભવિષ્યતિ ।
પુનશ્ચાહં યદા ભીમં રૂપં કૃત્વા હિમાચલે ॥ ૫૦॥

રક્ષાંસિ ભક્ષયિષ્યામિ મુનીનાં ત્રાણકારણાત્ ।
તદા માં મુનયઃ સર્વે સ્તોષ્યન્ત્યાનમ્રમૂર્તયઃ ॥ ૫૧॥

ભીમાદેવીતિ વિખ્યાતં તન્મે નામ ભવિષ્યતિ ।
યદારુણાખ્યસ્ત્રૈલોક્યે મહાબાધાં કરિષ્યતિ ॥ ૫૨॥

તદાહં ભ્રામરં રૂપં કૃત્વાસંખ્યેયષટ્પદમ્ ।
ત્રૈલોક્યસ્ય હિતાર્થાય વધિષ્યામિ મહાસુરમ્ ॥ ૫૩॥

ભ્રામરીતિ ચ માં લોકાસ્તદા સ્તોષ્યન્તિ સર્વતઃ ।
ઇત્થં યદા યદા બાધા દાનવોત્થા ભવિષ્યતિ ॥ ૫૪॥

તદા તદાવતીર્યાહં કરિષ્યામ્યરિસંક્ષયમ્ ॥ ૫૫॥

॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
નારાયણીસ્તુતિઃ સમ્પૂર્ણા ॥ ૧૧॥

નારાયણીસૂક્તમ્

મહાલસા નારાયણીસ્તુતિઃ
કાત્યાયનીસ્તોત્રમ્ (સર્વસઙ્કટકાલે)

Verses upto sarvAbAdhAprashamanaM (39) are
considered nArAyaNIsUktam by some and up to 35
as kAtyAyanI stotram (purANakAvyastotrasudhA)
Verses 7-23 are used as mahAlasA nArAyaNIstutiH

Encoded by Smt. K. Shankaran and
reencoded by Kirk Wortman
Proofread by Sunder Hattangadi and Kirk Wortman

*Narayani Stutih*
pdf was typeset on October 15, 2024

Please send corrections to *sanskrit@cheerful.com*